# Shri Kiladevacharyavirachitam Sadhanabhaktidarpanam

# શ્રીકીલદેવાચાર્યવિરચિતં સાધનભક્તિદર્પણમ્

## Document Information

Text title : Shri Kiladevacharyavirachitam Sadhanabhaktidarpanam

File name : sAdhanabhaktidarpaNamkIladevAchArya.itx

Category : raama, rAmAnanda, upadesha, advice

Location : doc_raama

Author : kIladevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીકીલદેવાચાર્યવિરચિતં સાધનભક્તિદર્પણમ્

નત્ત્વા ભાષ્યકૃતં રામાનન્દં રામં ગુરું તથા ।
ભક્તાનન્દપ્રદં કુર્વે સાધનભક્તિદર્પણમ્ ॥ ૧॥

રામસ્ય તૈલધારાવદ્ વિચ્છેદરહિતા સ્મૃતિઃ ।
પુરુષાર્થાત્મિકા ભક્તિસ્તત્સાધિકા મતા નવ ॥ ૨॥

નામ્નો ધામ્નશ્ચરિત્રસ્ય રૂપસ્ય યશસોઽપિ ચ ।
શ્રવણે રઘુનાથસ્ય પ્રોક્તા શ્રવણભક્તિતા ॥ ૩॥

શ્રદ્ધયા રસધામ્નો હિ નામ્નો રૂપાદિકસ્ય ચ ।
કીર્ત્તને રામચન્દ્રસ્ય કીર્ત્તનભક્તિતોદિતા ॥ ૪॥

સર્વેશસ્ય જગદ્ધેતોર્નિર્દોષસ્ય ગુણામ્બુધેઃ ।
સ્મરણે મૈથિલીશસ્ય સ્મરણભક્તિતા સ્મૃતા ॥ ૫॥

પાપિપાવનરામસ્ય શ્રદ્ધયા પાદપદ્મયોઃ ।
સેવને ચ મતા પ્રાજ્ઞૈઃ પાદસેવનભક્તિતા ॥ ૬॥

અમોઘાર્ચનરામસ્ય મુક્તિદં પાપનાશનમ્ ।
અર્ચનં શ્રદ્ધયા વિજ્ઞૈરર્ચનત્વેન સમ્મતમ્ ॥ ૭॥

સર્વદુઃખહરે પુંસાં સર્વસૌખ્યકરે તથા ।
વન્દને રાઘવેન્દ્રસ્ય વન્દનભક્તિતા મતા ॥ ૮॥

પરિતઃ સેવનં શ્રીમદ્રામસ્ય સર્વશેષિણઃ ।
દાસ્યભક્તિતયા પ્રોક્તં ભક્તિતત્ત્વવિશારદૈઃ ॥ ૯॥

તનુવિત્તસુતાદિભ્યઃ સર્વેભ્યશ્ચાધિકશ્ચ યઃ ।
સ્નેહઃ શ્રીરાઘવસ્યાત્ર સખ્યભક્તિતયોદિતઃ ॥ ૧૦॥

વૈરાગ્યપૂર્વકં શ્રીમદ્રામાયાત્મસમર્પણમ્ ।
બુધૈર્નામ્ના હિ તત્પ્રોક્તં ભક્તિરાત્મનિવેદનમ્ ॥ ૧૧॥

દ્વારપીઠેશ્વરશ્રીમત્કીલાચાર્યેણ નિર્મિતમ્ ।
ભક્તમોદાવહં ભૂયાત્ સાધનભક્તિદર્પણમ્ ॥ ૧૨॥

ઇતિ શ્રીકીલદેવાચાર્યવિરચિતં સાધનભક્તિદર્પણં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Kiladevacharyavirachitam Sadhanabhaktidarpanam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*